## नवमः पाठः

# ग्रामजीवनम्

(पत्रवाहकः द्वारघण्टिकां वादयति। दीपिका द्वारम् उद्घाट्य पत्रवाहकात् पत्रं स्वीकृत्य मातरं प्रसन्नतया वदति, "अम्ब! अम्ब! पश्य भ्रातुः पत्रम्" इति उक्त्वा मात्रे पत्रं ददाति। माता पत्रं पठति।)

छात्रावासः

उत्कृष्टविद्यालयः

इन्दौरनगरम्

दिनाङ्कः - 11-10-05

पूज्यमातृपितृचरणयोः

सादरं प्रणामाः।

अहम् अत्र कुशली अस्मि। छात्रावासे स्थित्वा सम्यक् अध्ययनं करोमि। गृहे सर्वेषां कुशलं प्रार्थयामि। भवती स्वस्था भूत्वा पूर्ववत् गृहकार्याणि करोति इति ज्ञात्वा अहं सन्तुष्टः अस्मि। मासिकमूल्याङ्कने भगिन्याः प्रथमस्थानमेव स्यात् इति चिन्तयामि।



अहं विगतसप्ताहे अस्माकं विद्यालयस्य छात्रैः सह मिलित्वा रामपुरग्रामं भ्रमणार्थम् अगच्छम्। तं ग्रामं दृष्ट्वा अहम् अतिप्रसन्नः अभवम्। ग्रामं परितः कृषिभूमिः, गोचारणभूमिः विभिन्नवृक्षाश्च सन्ति। ग्रामस्य पार्श्वे एका नदी प्रवहति अतः अत्र शुद्धवायुः वहति। एषः ग्रामः नगरात् दूरे स्थित्वा औद्योगिकप्रदूषणात् रहितः अस्ति। अतः पशुपक्षिणः अत्र स्वच्छन्दतया विचरन्ति। अस्मिन् ग्रामे धेनवः, महिष्यः बलीवर्दादयः बहवः पशवः सन्ति। अत्र ग्रामे जनाः प्रायः कृषिकार्यं कृत्वा सरलजीवनं यापयन्ति। परिश्रमशीलाः



एते कृषकाः तापं शीतं वृष्टिं च सहित्वा कृषिकर्म कुर्वन्ति। ग्रामीणानां व्यवहारः सरलः प्रेमपूर्णश्च अस्ति। वयं तैः सह मिलित्वा वार्तालापं कृत्वा ग्रामजीवनविषये ज्ञातवन्तः। तत्र प्रभूतं दुग्धं, दधि, नवनीतं, हरितशाकानि, उष्णस्निग्धरोटिकाश्च खादित्वा हट्टम् अगच्छाम। तस्मिन् साप्ताहिकहट्टे विविधाः आपणाः भवन्ति। एतं हट्टम् आगत्य विक्रेतारः नित्योपयोगिवस्तूनि, हस्तशिल्पकलावस्तूनि, गोधूमचणकादिखाद्यवस्तूनि, गृहोपयोगिवस्तूनि च विक्रीय धनम् अर्जयन्ति। ग्रामवासिनः हट्टात् वस्तूनि स्वीकृत्य गच्छन्ति। कक्षायां पठितम् आसीत् यत् "अस्माकं देशः कृषिप्रधानः अस्ति, देशस्य अधिकाः जनाः ग्रामेषु वसन्ति, ग्रामः एव देशस्य आधारः" इति स्मृत्वा इदानीं ज्ञातं यत् "वास्तविकं भारतं नाम ग्राम एव, ग्रामोन्नतौ एव देशोन्नतिः सन्निहिता" इति।

भवतु, पत्रं समापयामि। ग्रीष्मावकाशे वयं सर्वे मिलित्वा समीपस्थं "झिरी" ग्रामं गत्वा तत्रत्यं प्राकृतिकं सौन्दर्यं द्रक्ष्यामः। तस्य ग्रामस्य इदं महद् वैशिष्ट्यं यत् प्रायः सर्वे जनाः संस्कृतेन एव भाषन्ते। आगामिमासे मम अर्द्धवार्षिकमूल्याङ्कनम् अस्ति। अन्यत् सर्वं शुभम्। सर्वेभ्यः पुनर्नमस्कारः। पत्रोत्तरस्य प्रतीक्षारतः।

भवतः पुत्रः

दीपेशः

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| विगतसप्ताहे | = | पिछले सप्ताह | दृष्ट्वा | = | देखकर |
| सहित्वा | = | सहकर | परितः | = | चारों ओर |
| गोचारणभूमिः | = | गाय चराने के लिए भूमि | महिष्यः | = | भैंसे |
| स्वच्छन्दम् | = | स्वतंत्र रूप से | वृष्टिः | = | बरसात |
| बलीवर्दाः | = | बैल | आपणाः | = | दुकानें |
| हट्टः | = | बाजार | अम्ब! | = | माँ (सम्बोधन) |
| द्रक्ष्यामः | = | देखेंगे | सन्निहिता | = | छिपी हुई है |
| प्रभूतम् | = | अत्यधिक मात्रा में | भाषन्ते | = | बोलते हैं। |
| महद् वैशिष्ट्यम् | = | महती विशेषता | | | |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत–**

   (क) दीपेशः कं ग्रामं भ्रमणार्थम् अगच्छत्?

   (ख) ग्रामीणानां व्यवहारः कथम् अस्ति?

   (ग) देशस्य आधारः कः?

   (घ) देशोन्नतिः कुत्र सन्निहिता?

   (ङ) दीपेशस्य छात्रावासः कस्मिन् नगरे अस्ति?

2. **एकवाक्येन उत्तरं लिखत–**

   (क) ग्रामं परितः किं किम् अस्ति?

   (ख) ग्रामे के के पशवः सन्ति?

   (ग) झिरीग्रामस्य महद् वैशिष्ट्यं किम्?

   (घ) हट्टे विक्रेतारः किं किं विक्रीणन्ति?

   (ङ) कृषकाः कथं कृषिकर्म कुर्वन्ति?

3. **रेखाङ्कितपदानाम् आधारेण प्रश्ननिर्माणं कुरुत–**

   (क) छात्रावासे स्थित्वा सम्यक् अध्ययनं करोमि।

   (ख) मासिकमूल्याङ्कने भगिन्याः प्रथमस्थानम् स्यात्।

   (ग) ग्रामं परितः कृषिभूमिः अस्ति।

(घ) वास्तविकं भारतं नाम ग्राम एव ।

(ङ) तैः सह मिलित्वा वार्तालापं कृतवन्तः।

## 4. पाठाधारेण क्त्वान्तपदानि लिखत–

| | पदानि | धातुः | | प्रत्ययः | | क्त्वान्तरूपम् |
|---|---|---|---|---|---|---|
| **यथा-** | भवति | (भू) | + | क्त्वा | = | भूत्वा |
| (क) | मिलति | (मिल्) | + | क्त्वा | = | ............... |
| (ख) | पश्यति | (दृश्) | + | क्त्वा | = | ............... |
| (ग) | करोति | (कृ) | + | क्त्वा | = | ............... |
| (घ) | सहति | (सह्) | + | क्त्वा | = | ............... |
| (ङ) | स्मरति | (स्मृ) | + | क्त्वा | = | ............... |
| (च) | शृणोति | (श्रु) | + | क्त्वा | = | ............... |
| (छ) | गच्छति | (गम्) | + | क्त्वा | = | ............... |
| (ज) | पठति | (पठ्) | + | क्त्वा | = | ............... |

## 5. उदाहरणानुगुणं ल्यबन्तरूपाणि लिखत–

| | उपसर्गः | | धातुः | | प्रत्ययः | | ल्यबन्तरूपम् |
|---|---|---|---|---|---|---|---|
| **यथा-** | आ | + | नी | + | ल्यप् | = | आनीय |
| (क) | उत् | + | स्था | + | ल्यप् | = | ............. |
| (ख) | वि | + | क्री | + | ल्यप् | = | ............. |
| (ग) | स्वी | + | कृ | + | ल्यप् | = | ............... |
| (घ) | प्र | + | क्षाल् | + | ल्यप् | = | ............... |
| (ङ) | वि | + | चिन्त् | + | ल्यप् | = | ............... |
| (च) | वि | + | ज्ञा | + | ल्यप् | = | ............... |
| (छ) | वि | + | लिख् | + | ल्यप् | = | ............... |
| (ज) | उप | + | कृ | + | ल्यप् | = | ............... |
| (झ) | आ | + | गम् | + | ल्यप् | = | ............... |

6. **क्त्वा/ल्यप् योगेन वाक्यानि योजयन्तु–**

**यथा–** बालिका प्रश्नान् पठति। उत्तराणि लिखति।
बालिका प्रश्नान् पठित्वा उत्तराणि लिखति।

(क) बालकः फलं खादति। दुग्धं पिबति।

(ख) कविः संस्कृतं जानाति। काव्यं लिखति।

(ग) ऋचा गृहम् आगच्छति। गृहकार्यं करोति।

(घ) अर्चकः देवालयं गच्छति। पूजां करोति।

(ङ) माता शाकानि आनयति। पाकं करोति।

(च) जनकः प्रभाते उत्तिष्ठति। योगाभ्यासं करोति।

(छ) दीपेशः हस्तं प्रक्षालयति। भोजनं करोति।

(ज) समिधा मनसि विचिन्तयति। लेखं लिखति।

(झ) आराधना स्नानं करोति। पूजां करोति।

(ञ) विक्रेता वस्तूनि विक्रीणाति। धनम् अर्जयति।

7. **भिन्नप्रकृतिकं पदं चिनुत–**

(क) गत्वा, पठित्वा, भूत्वा, हसित्वा, पठितुम्।

(ख) दुग्धम्, दधि, नवनीतम्, तक्रम्, रोटिका।

(ग) भ्राता, भगिनी, माता, पिता, शिक्षकः।

(घ) काकः, कोकिलः, कपोतः, शुकः, मत्स्यः।

**योग्यताविस्तारः –**

- ग्रामीणजनानां दिनचर्यां ज्ञात्वा पञ्चवाक्यानि लिखत।